# पञ्चमोऽङ्कः ।

(ततः प्रविशति धावनश्रमखिन्नो जयन्तः कचश्च ।)

(प्रविश्य ।)

**जयन्तः** - (सोच्छ्वासम् ।) अयि गुरुपुत्र पश्य दिवसोऽप्यस्मत्प्राण इव अर्द्धावशेषः । शत्रुरिवोपतापयत्यातपश्च ।

**कचः** - एवमेवैतत् । (ऊद्ध्र्वमवलोक्य ।) कुमार पश्य ।

**दृष्ट्वा चण्डकरं प्रतापजनकं छायाऽपि लीना पदे**
**किञ्चैता मृगतृष्णिकाः प्रविततप्रान्तोत्तरङ्गाः पुरः ।।**
**दृश्यन्ते नहि पत्रिणोऽत्र विजनेऽरण्ये स्वनीडस्थितास्-**
**तस्मात्पक्षविहीनतामुपगतैरेतन्निषेव्यं क्षणम् ।।१।।**

**जयन्तः** - सखे एवमेव ।

**कचः** - तदलङ्करोत्वेतत्सहकारच्छायां कुमारः ।

**जयन्तः** - यथा रोचते गुरुपुत्राय । (इत्युभावुपविशतः ।)

**जयन्तः** - (दीर्घमुष्णं च निःश्वस्य ।) (आकाशे दत्तदृष्टिः ।) हं हो हतविधे कीदृशस्ते परिणामः । यतः ।

**यो वृन्दारकवृन्दवन्दितपदस्त्रैलोक्यनाथस्स्वयं**
**त्यक्त्वा स्वास्पदमद्रुतं परिजनैर्ऋद्ध्या समं तत्क्षणम् ।।**
**लीनः क्वापि पुरोधसा सह पराभूतोऽरिभिः साम्प्रतं**
**देवेन्द्रः किल पादसञ्चरपरः कालस्य चित्रा गतिः ।।२।।**

(इति सास्रस्तूष्णीं तिष्ठति ।)

**कचः** - कुमार

**कालज्ञस्य च धीरस्य विषादो दूषणावहः ।।**

**जयन्तः** - अयि गुरुपुत्र किं ब्रवीमि ।

**कालज्ञत्वं च धीरत्वं सूचयत्यत्र हि स्थितिः ।।३।।**

**कचः** - मैवं सङ्गदीः यतः ।

**प्राप्तकालस्य शूरस्य शस्त्रिणश्च विशेषतः ।।**
**वञ्चनं रणरङ्गस्य दूषणस्यास्पदं सखे ।।४।।**

**जयन्तः** - गुरुपुत्र कालोचितं ते वचः न तु शूरोचितम् । यतः ।

**अकालेऽप्यथवा काले रणाङ्गणतले रिपोः ।।**
**मरणं मारणं वाऽपि श्रेयः शस्त्रैर्न चेतरत् ।।५।।**

**कचः** - एवमेवैतत् तथापि नायमवसरः । यतः ।

**वृत्रं पाकबलौ ददार युधि यः पाता सुराणां सदा**
**भ्राता यस्य बलिं बबन्ध किल यो माता त्रिलोक्या द्रुतम् ।।**
**पुत्रस्त्वत्सदृशः पविः करगतः सेनाग्रणीरग्निभूस्-**
**सोऽपि क्वापि विलीनतामुपगतः कालस्ततो दुष्करः ।।६।।**

**जयन्तः** - यथा वदति गुरुपुत्रस्तथैव । यतः ।

**दैत्यः क्षुद्रतरश्चकार सहसा राज्यं दिवि क्रोशयन्**
**देवान् सानुचरान् स्वनाथरहितान् वर्षर्तुरेष स्वयम् ।।**
**देवस्त्रीक्षणवारिभृत्स्रुतजलैरुष्णैश्च जंबालितं**
**कुर्वन् दैत्यवधूप्रमोदनयनोद्भूताम्बुभिस्तत्पुरम् ।।७।।**

किञ्च । गुरुचरणानां पितृचरणानां चागोचरता दुनोत्यतितरां मम चेतः ।

**कचः** - कुमार मामपीयमेव चिन्ता बाधते परं रूपान्तरेण देशान्तरे स्थितिर्भवेदिति तर्कयामि ।

**जयन्तः** - हुं सम्भाव्यते तथैव ।

(नेपथ्ये मयूरकलहंसयोर्ध्वनिः ।)

(श्रुत्वा ।)

**जयन्तः** - (सचकितम् ।) गुरुपुत्र मयूरकलहंसयोर्ध्वनिरिव श्रूयते ।

**कचः** - किमाश्चर्यमरण्ये ।

**जयन्तः** - ईदृशे निर्जलेऽवसरेऽरण्ये चाश्चर्यमेव । शङ्कते मे हृदयमासुरीमायेति ।

**कचः** - राजपुत्र मामैवमेतन्मधुरिमामृतं कर्णचषकाभ्यामापीय धैर्यमावहते मद्धृदयम् ।

**जयन्तः** - (किञ्चिद्दक्षिणाक्षिस्पन्दनं सूचयित्वा सधैर्यम् ।)

गुरुपुत्र एवमेव ।

(ततः प्रविशति मयूरः कलहंसश्च ।)

(उभौ रसालशाखायामुपविशतः ।)

**जयन्तः** - (ऊद्ध्र्वमवलोक्य ।) गुरुपुत्र पश्य पश्य ।

**अस्तोकतपसस्साक्षात् प्रभाव इव मूर्त्तिमान् ।।**
**यशःस्तोमः सुरपतेर्वेति हंसः प्रभात्यसौ ।।८।।**

**कचः** - (ऊद्ध्र्वमवलोक्य ।) एवमेवैतत् । ईदृगसदृशसमयेऽप्यानन्दयति चक्षुः ।

**जयन्तः** - (पुनरूद्ध्र्वमवलोक्य ।) गुरुपुत्र पश्य पश्य । तत्सहचरस्य मयूरस्यापि रामणीयकम् अन्यादृशम् ।

**स्फीताम्बुदकान्तिं कण्ठेनायं विडम्बयते किञ्च ।।**
**पिच्छैरक्षिगणं मत्पितुरेवाऽयं सुखप्रदो दृष्ट्योः ।।९।।**

**कचः** - एवमेव नेत्रासेचनकमस्य वपुः ।

**जयन्तः** - भवतु जोषंभावेन शृणुवस्तावदनयोर्मधुरालापम् ।

(इत्युभौ तूष्णीं तिष्ठतः ।)

**मयूरः** - हंसगुरो क्वापि विलीनस्य शत्रोस्सहसोन्नतेः किं कारणं तन्न जाने ।

**हंसः** - अयि मयूरेन्द्र प्रसिद्धमेव कारणं जगत्कारणस्य विधेः प्रसादः ।

**मयूरः** - हंस भगवँस्तत्रापि किं कारणं तन्न जाने ।

**हंसः** - मयूरेन्द्र शृणु तावत्कथयामि ।

**चण्डश्चण्डतरं किल तप्त्वा सुचिरं तपः सुरश्लाघ्यम् ।।**
**चतुरास्याच्चतुरोऽयं लेभेऽलभ्यान् वरान् परां प्रीतिम् ।।१०।।**

**जयन्तः** - गुरुपुत्र आश्चर्यमाश्चर्यम् । मयूरपृच्छया हंसः कस्यापि निरूपयति वृत्तम् । तन्न जाने कस्य भवेत् ।

**कचः** - कुमार स्वल्पं जल्पक्रमेण स्फुटीभविष्यति ।

**मयूरः** - हंसगुरो कान् वरान् लेभे तत्स्पष्टतया ज्ञातुमिच्छामि ।

**हंसः** -

**देवोरगयक्षासुरकिन्नरनरपशुपतत्रिभिर्लोके ।।**
**अन्तर्बहिरचरैरप्यमरत्वं तद्विसृष्टभूतैः सः ।।११।।**

**मयूरः** - हन्त इदमेवानर्थमूलम् । ततस्ततः ।

**हंसः** - ततो वरेन्धनानुसन्धानसन्धुक्षितेन काव्यकृपासर्पिस्सेकसंवृद्धज्वाला-जालावलीढेन तपःप्रभावधनञ्जयेन प्रकाशमानः स्वजनमानसमानन्दयन् सानन्दं निजराजधानीं प्रत्यवाप ।

**मयूरः** - ततस्ततः ।

**हंसः** - ततोऽनिशमनिमिषद्वेषसमुन्मेषकषायितान्तःकरणा निष्करुणाः परुषाः पुरुषामिषभक्षका दैत्यकुलरक्षकाः क्षिप्रं दुर्लभवरलाभातनुतनुत्रगाढसन्नद्धं विपक्षक्षपणदीक्षादीक्षितं निजरक्षणदक्षिणं तं सविनयमेवमाचख्युः ।

**भो भोस्तपोऽमृतरसैः परिपुष्टसारस्-**
**त्वं चातिदुर्लभवराख्यतनुत्रयुक्तः ।।**
**देवेन्द्रदर्पगिरिखण्डनपण्डितः सँस्-**
**तूष्णीं स्थितः किमधुनाऽप्यसि दैत्यवर्य ।।१२।।**

**मयूरः** - ततस्ततः ।

**हंसः** - ततस्सोऽपि स्वान्तःकरणालवालप्रोत्फुल्लमनोरथतरुप्रोल्लासकं तद्वचनवारिप्रवाहं श्रोत्रप्रणालीप्रसर्प्पिणमारचय्यैवमाबभाषे ।

**नानाकङ्कटधारिणः करलसत्खड्गादिभिर्भीषणाः**
**शस्त्रास्त्रेषु विशारदाश्च रथिनः पादातिकाश्चाश्वगाः ।।**
**सज्जाः सन्तु करीन्द्ररोहणपराः सङ्ग्रामसञ्चारिणः**
**स्वर्गग्रामटिकाविलुण्ठनपराः सेनाधिपाः साम्प्रतम् ।।१३।।**

**मयूरः** - ततस्ततः ।

**हंसः** - तदनु तदनुगेषु दनुजेषु तदनुज्ञया सोद्योगेषु तदवसरे सम्प्राप्तेन भगवता शुक्रेणाशीराशिना सह दत्ताभ्यनुज्ञो दैत्यदन्तावलोऽविलम्बितं प्रयाणायोपचक्रमे । एतदेव दैत्यपतेस्सहसोन्नतेः कारणम् । तदाज्ञायैवा-वहित्थादुर्गाश्रयणमेवोपदिष्टम् ।

**मयूरः** - परावरज्ञेन भवता कालोचितमेवोपदिष्टं परं न जाने पश्चात्किमभूत् ।

**हंसः** - स्फुटीभविष्यत्यचिरेणैव कालेन ।

**जयन्तः** - गुरुपुत्र श्रुतं दैत्येश्वरस्यैव वृत्तान्तं परं काविमाविति सन्देहस्य निर्णयो नाभूत् ।

**कचः** - कुमार स्वल्पं जल्पाल्पेनैव कालेन निर्णयो भविष्यति ।

(नेपथ्ये काकध्वनिः ।)

**मयूरः** - (सचकितम् ।) अयि हंसगुरो

**नास्त्यामिषलेशोऽपि क्वाप्युच्छिष्टं मनुष्यरहितेऽस्मिन् ।।**
**श्वापदरहिते हि वने काकध्वनिरेष निर्जले कस्मात् ।।१४।।**

**हंसः** - कोऽत्र शङ्कालेशोऽपि सर्वत्र सञ्चारिणोऽस्य ध्वनौ ।

**मयूरः** - एवमेव तथाप्यदक्षिणेऽस्मिन् कालेऽवहित्थाशङ्काजम्बालमलं कलुषयति मानसम् ।

(ततः प्रविशति काकः ।)

(प्रविश्य ।)

**काकः** - (बहुतरं स्वजातीयं शब्दमुड्डीनं च कृत्वा ।) हन्त श्रान्तोऽस्मि शिथिलितौ मे पक्षौ भृशं बाधेते क्षुत्पिपासे परं कार्यगौरववशान्न गणयामि । (सर्वतोऽवलोक्य । सनिर्वेदम् ।) ननु क्व तावदन्वेषयामि पुत्राभ्यां समं विलीनौ धिषणमहेन्द्रौ । अवलोकिता च मया त्रिलोकी । तथापि न पश्यामि । साम्प्रतं स्वाम्याज्ञाभङ्गभीरुणा मया किमनुष्ठेयम् ।

(श्रुत्वा हंसमयूरौ कचजयन्तौ च स्वस्वस्थाने सभयं निलीनौ तिष्ठतः ।)

**मयूरः** - (स्वल्पस्वरेण ।) हंसगुरो यन्मया शङ्कितं तदेव प्रतिपन्नम् ।

**हंसः** - हुं सम्भाव्यते तथैव ।

**जयन्तः** - (स्वल्पस्वरेण ।) अयि गुरुपुत्र कीदृशोऽयमकाले वज्रपातः । यद्वा । दैवे ह्यदक्षिणे सर्वं सम्भाव्यते ।

**कचः** - यथा वदति कुमारः ।

**काकः** - भवतु क्षणं वृक्षाश्रयणेन स्वस्थीकरोम्यात्मानम् । (इति तस्मिन्नेव वृक्ष उपरिशाखायामुपविशति ।)

**हंसमयूरौ** - (सभयमात्मानं पर्णैराच्छाद्य तूष्णीं तिष्ठतः ।)

**काकः** -

**प्राप्याद्य पुत्रेण समं महेन्द्रं गुरुं तथा तावुपदीकरोमि ।।**
**स्वाम्यग्रतो यद्यमुना सुकर्मणा गच्छामि सत्सेवकतां विशेषात् ।।१५।।**

**मयूरः** - (स्वल्पस्वरेण ।) हंसगुरो शत्रुरेवास्मानन्वेषयतीति नात्र सन्देहः ।

**हंसः** - (सभयम् ।) हुम् एवमेव ।

**जयन्तः** - गुरुपुत्र हतौ स्वः । किं तावदनुष्ठेयमावाभ्याम् ।

**कचः** - कुमार त्वं मा खिन्था ईश्वरः शं विधास्यतीति धैर्यमवलम्बस्व ।

**काकः** - (सर्वतोऽवलोक्य । स्वगतम् ।) मा तावन्मम रूपान्तरभयादत्रैव ते विलीनाः स्युरतः प्रकाशयाम्यात्मानं वचनरचनया ।

(प्रकाशम् ।)

**लोकेषु त्रिषु यस्य शासनविधिः ख्यातः प्रजाशुद्धये**
**सोऽहं दण्डधरस्स्वयं यम इह प्राप्तो विधेराज्ञया ।।**
**धृत्वा वायसविग्रहं मृगयितुं शक्रं सपुत्रं गुरुं**
**नो पश्याम्यखिलेषु तान् हि भुवनेष्वन्तर्हितान् पर्यटन् ।।१६।।**

**मयूरः** - (श्रुत्वा । स्वल्पस्वरेण ।) हंसगुरो । श्रुतं विमोहयत्ययमस्मान्वाक्प्रपञ्चेन ।

**हंसः** - एवमेव स्वकार्यसाधकोऽयम् ।

**जयन्तः** - (स्वल्पस्वरेण ।) गुरुपुत्र शृणु अस्मान्प्रत्यक्षीकर्त्तुं प्रपञ्चयति वाक्प्रपञ्चम् ।

**कचः** - कुमार किमपि करोत्वयमावयोस्तु जोषंभाव एव शरणम् ।

**काकः** - (क्षणं विमृश्य । स्वगतम् ।) कथमत्रापि न सन्ति ते । (क्षणं विमृश्य ।) तर्हि किमनुष्ठेयं मया । (दक्षिणाक्षिस्पन्दनं सूचयित्वा । सानन्दम् ।) (''**लोकेषु त्रिषु**'' इत्यादि पुनः पठति ।)

(नेपथ्ये ।)

**अन्तर्हितस्याद्रिरिपोर्गुरोश्च**
**पुत्रेण साकं रिपुशङ्कयाऽस्य ॥**
**गतः क्व वा शोधयिता यमोऽपि**
**तं शोधयेऽहं किल चित्रगुप्तः ॥१७॥**

(ततः प्रविशति चित्रगुप्तः ।)

(प्रविश्य ।)

(''**अन्तर्हितस्य**'' इत्यादि पठति ।)

(हंसमयूरौ कचजयन्तौ च पुनः शत्रुशङ्कयाऽऽत्मानं गोपायतः ।)

**काकः** - (सहर्षम् ।) प्राप्तोऽयं मन्त्रिवरश्चित्रगुप्तः ।

**चित्रगुप्तः** - (ऊद्ध्र्वमवलोक्य ।) विजयतां स्वामी । दर्शयत्वात्मानं दर्शनोत्सुकमनुचरम् ।

**काकः** - (स्वस्वरूपमवलम्ब्य वृक्षादवतरणं नाटयति ।)

**चित्रगुप्तः** - (तत्पादयोर्निपतति ।)

**यमः** - भद्र उत्तिष्ठ कथय तवागमनकारणम् ।

**चित्रगुप्तः** - (उत्थाय । सविनयमञ्जलिं बद्ध्वा ।) स्वामिन् प्रेषितोऽस्मि देवर्षिणा नारदेन भवदन्वेषणाय भगवतश्चतुर्मुखस्य निदेशात् । तद्दर्शनामृतसेचनेन निर्वापितो विरहवह्निः । कृतश्च कृतकृत्योऽहम् । परं साम्प्रतं स्वामिचिकीर्षितं याथातथ्येन ज्ञातुमिच्छामि ।

**यमः** - (''**लोकेषु त्रिषु**'' इत्यादि पठति ।)

**चित्रगुप्तः** - (साश्चर्यम् ।) कठिनतरमिदम् । अधुना क्व तावदन्वेषणीयौ तौ ।

**यमः** - (क्षणं विमृश्य ।) (सभक्त्युन्मेषम् ।)

**यत्र श्रीकमलापतिस्स भगवांल्लोकैकनाथस्सदा**
**भक्तान्मुक्तिचतुष्टयं तु सुलभं दास्यँश्च भक्तिं पराम् ।।**
**लोकेषु त्रिषु पाति संस्थित उरुक्लेशात्कृपावारिधिस्-**
**तस्मिँल्लोकवरे शरण्यशरणे तौ प्रेक्षणीयौ मया ।।१८।।**

**चित्रगुप्तः** - तर्हि स्वामिन एव भ्रमणक्लेशोऽवशिष्टः । नास्मत्सदृशानां तत्र गतिः ।

**यमः** - (सभक्त्युत्पुलकम् ।) मा तावदसदृशं सङ्गदीः ।

**क्लेशो दुरत्ययो यस्य स्मरणेनैव लीयते ।।**
**तल्लोकं गच्छतः क्लेशः कथं स्यान्मम साम्प्रतम् ।।१९।।**

अयि भद्र किं ब्रवीमि ।

**यत्पादपद्मकरन्दनिषेवणाय**
**ब्रह्मादयोऽपि विबुधास्सततं समाधिम् ।।**
**तन्वन्ति यद्यपि तथापि सुदूर एव**
**गन्तुस्तदीयभुवनं तु क एव खेदः ।।२०।।**

भद्र तस्मादनुगृहीतोऽहं कृपालुभ्यां धिषणमहेन्द्राभ्यां यदकस्मान्मम प्राणैकनाथस्य भगवतो विष्णोर्दर्शनामृतपात्रीभविष्यामि ।

**चित्रगुप्तः** - (अञ्जलिं बद्ध्वा ।) स्वामिन्नज्ञस्वभावात्किञ्चिदाश्चर्यं मां मुखरयति ।

**यमः** - भद्र कथय तावत् ।

**चित्रगुप्तः** - स्वामिन् प्रतिपादितं भवता स लोकश्चतुर्मुखादिभिरप्यगम्य इति तत्कथं स्वामिना धिषणमहेन्द्राभ्यां सपुत्राभ्यां च गम्यः । (इति सलज्जोऽधोमुखस्तूष्णीं तिष्ठति ।)

**यमः** - (सस्मितम् ।) भद्र मैवं लज्जावनम्रो भव । उपदेशसुधासारेण दूरीकरोम्याश्चर्यपङ्कम् । शृणु तावत् ।

**यज्ञदानतपोहोमयागैर्नानाविधैस्तु सः ।।**
**न लभ्यस्सुलभो भक्त्या शरण्यः शरणेच्छुभिः ।।२१।।**

**यस्मात्तेनैव विभुना सत्यवाचा प्रकीर्तितम् ।।**
**भक्त्याहमेकया ग्राह्य इति तस्माद्ददाम्यहम् ।।२२।।**

(पुनः सानन्दाश्रु ।) भद्र किं बहुना ।

**अजामिलोऽपि येनैव नामोच्चारणमात्रतः ।।**
**उपचारान्मोचितो द्रागस्मत्पाशात्पुरा स्मर ।।२३।।**

**चित्रगुप्तः** - (सभक्तिप्रसरम् ।) स्वामिन् सत्यं सत्यम् । स्मृतं मया अनुगृहीतोऽहं मोहध्वान्तनिराकरणेन । (इति तत्पादयोर्निपतति।)

**यमः** - (सभक्तिप्रसरम् ।) अहो माहात्म्यं श्रवणभक्तेर्यत्क्षणमात्रेण सकलजगत्पुण्यपापालोचनेऽजस्रं निरतस्याप्यस्य सम्पन्ना भक्तिसम्पत्तिरत एवेयमाद्या । भद्र उत्तिष्ठ उत्तिष्ठ । भगवद्भक्त्या सिद्धोऽसि।

**चित्रगुप्तः** - (उत्थाय । सोत्पुलकम् ।) (सानन्दाश्रु अञ्जलिं बद्ध्वा ।) स्वामिन् कल्पतरुस्वभावस्य तस्य भगवतः प्रियानुचरस्य तवैव समागमस्य प्रभावस्समुज्जृम्भते नान्यत् ।

**यमः** - भद्र सत्यमुदाहृतं त्वया तत्प्राप्तेस्तद्भक्तसमागम एव कारणम् ।

**मार्कण्डेयश्चित्रकेतुस्तादृशा बहवो जनाः ।।**
**भगवद्भक्तसङ्गेन भक्तेः काष्ठां पराङ्गताः ।।२४।।**

**चित्रगुप्तः** - स्वामिन् किमधुना करणीयम् ।

**यमः** - ("**यत्र श्रीकमलापतिः**" इत्यादि पठति ।)

**चित्रगुप्तः** - यथाभिलषितं स्वामिनः ।

**यमः** - भद्र त्वमप्येह्यनुभुङ्क्ष्व श्रवणभक्तेः फलम् ।

**चित्रगुप्तः** - (सानन्दम् ।) यथादेशः स्वामिनः । (इत्युभौ गमनोद्योगं नाटयतः ।)

**मयूरः** - भगवन् वञ्चितौ स्वः । अयं त्वस्माकं सहजबन्धुर्धर्मराजः ।

**हंसः** - (सहर्षम् ।) एवमेव ।

**मयूरः** - तर्हि दर्शयावात्मानम् ।

**हंसः** - (उच्चस्वरेण ।) विजयतां धर्मराजः ।

**यमः** - (सर्वतोऽवलोक्य । सानन्दम् ।) अये बृहस्पतेरिव स्वरसंयोगः श्रूयते ।

**चित्रगुप्तः** - (सहर्षम् ।) हुं श्रूयते ।

**बृहस्पतिः** - (स्वस्वरूपमवलम्ब्य वृक्षादवतरति ।)

**यमः** - (सहसोपसृत्य । तत्पादयोर्निपतति ।)

**बृहस्पतिः** - यथार्थशासनपरो भगवद्धर्मनिरतश्च भव ।

**महेन्द्रः** - (स्वस्वरूपमवलम्ब्य वृक्षादवतरति ।)

**यमः** - भगवन् गुरो क्व तावदस्मच्छिरोमणिर्महेन्द्रः ।

**बृहस्पतिः** - (अङ्गुल्या दर्शयति ।)

**यमः** - (सस्नेहानन्दप्रसरम् । सत्वरमुपसृत्य तमालिङ्गति ।)

**कचः** - कुमार आवां वञ्चितौ स्वः । सर्वेऽप्येतेऽस्मदीया एव ।

**जयन्तः** - (साह्लादम् ।) हुम् एवमेव ।

(इत्युभौ सहसोपसृत्य । स्वस्वपितृपादयोर्निपततः ।)

**बृहस्पतिमहेन्द्रौ** - (तावुत्थाप्य परिष्वजतः ।)

**जयन्तः** - (बृहस्पतिमभिवादयति ।)

**बृहस्पतिः** - (हस्तमुदस्य । सानन्दम् ।) पितुराज्ञानुवर्त्ती विजयी च भव ।

**महेन्द्रः** - गुरुपुत्राऽहमभिवादये ।

**कचः** - विजयतां देवेन्द्रः ।

**यमः** - (सस्मितम् ।) गुरुपुत्र प्रणमामि ।

**कचः** - विजयी भव ।

**चित्रगुप्तः** - गुरुपुत्र प्रणमामि ।

**कचः** - स्वामिकार्यनिरतो भव ।

**यमचित्रगुप्तौ** - (जयन्तमनामयं पृच्छतः ।)

**जयन्तः** - (तौ प्रति ।) भवत्समागमेन निरामयोऽहम् ।

**महेन्द्रः** - (सखेदम् ।) अयि धर्मराज

**दोर्दण्डचण्डबलनिर्जितसर्वलोक-**
**सन्तापदेन दितिजेन हिरण्यनाम्ना ।।**
**लोकाः स्वपालसहिताः ककुभश्च सर्वा**
**नीता वशं स्वमहसा हततेजसः किम् ।।२५।।**

**यमः** - अयि देवराज अननुभूतपूर्वं दैत्यदुष्टदन्तिनो दुश्चरितं दुनोति मे हृदयम् । रुणद्धि मे कण्ठं दुःखजाश्रु । शोषयति मे तालुमूलं शोकाग्निः । कम्पयति मामपि तद्विशसितभूतानामनुकम्पा । घूर्णन्ते च ममाङ्गानि भ्रमणश्रमात्तन्न वक्तुं प्रभवाम्यतः स्वास्थ्यसम्पादिनीमिमामेव रसालच्छायामलङ्करोतु भवाँस्ततः स्वास्थ्यमवलम्ब्य तद्वृत्तं साकल्येन कथयामि ।

**महेन्द्रः** - यथाऽभिरोचते धर्मराजाय ।

(इति सर्वेऽपि रसालच्छायायामुपविशन्ति ।)

**महेन्द्रः** -

**अदृष्ट्वा तद्युद्धं प्रबलबलिनो दैत्यकरिणस्-**
**तदीयं वा रूपं विकृतविकृतं किञ्च सहसा ।।**
**विवृद्धं तत्तेजः सकलबलतेजःप्रतिहरं**
**तदीयां श्रुत्वाऽहं प्रधनलवगाथां हि चकितः ।।२६।।**

तन्नात्र स्वास्थ्यमवलम्ब्य स्थातुमुचितम् । वञ्चिका किलासुरी माया । (इति सभयमुत्थानं नाटयति ।)

**यमः** - (वस्त्राञ्चलं धृत्वा ।) अयि वज्रिँस्तिष्ठ तिष्ठ नात्र तद्गन्धस्यापि सम्भावना । यतः ।

**मत्वा नष्टानस्मान्नानासुखभोगतत्पराः प्रबलाः ।।**
**दैत्या दैत्यपसहिता दर्पध्वान्तान्धचक्षुषस्सन्ति ।।२७।।**

तद्धैर्यमवलम्ब्य शृणु तावत्सामग्र्येण तद्वृत्तान्तम् ।

**महेन्द्रः** - (सधैर्यम् ।) अयि धर्मराज तावदहमवहितोऽस्मि वर्णय त्वं तदसुरवारणस्य दुर्विलसितम् । यतः ।

**वृत्तं सानुशयानां कर्णौ हृदयं भिनत्ति यदपि भृशम् ।।**
**तदपि प्रतिविधियत्नं श्रोतव्यं कुर्वता प्रयत्नेन ।।२८।।**

**यमः** - सत्यमाह देवराजः अतएव चिकित्सकः कटुतरमौषधमिव कर्णाभ्यां कटुतरमपि तद्वृत्तं बलाद्ग्राहयितुमुद्युक्तोऽस्मि ।

**महेन्द्रः** - (सश्लाघम् ।) एवमेव । सहजबन्धूनामयमेव स्वभावः ।

**यमः** - शृणु तावत् ।

**नानायोधकरीन्द्रसङ्घनिबिडप्रान्ताग्रभागः पुरान्-**
**निश्चक्राम हिरण्यपूर्वकशिपुः पद्भ्यां क्षितिं कम्पयन् ।।**
**जित्वा भूविवराणि पूर्वमखिलान्यागत्य दर्पोद्धतस्-**
**त्यक्त्वा सैन्यमगात्स्वयं दिशमथो तां वारुणीं रंहसा ।।२९।।**

**महेन्द्रः** - ततस्ततः ।

**यमः** -

**तं लोकमेकः प्रलुलोड दर्प्पाद्-**
**दन्ती यथाब्धिं प्रबलो बलेन ।।**
**क्ष्वेडारवास्फोटितदिक्प्रदेशो**
**विवेश पाथःपतिसौधमाशु ।।३०।।**

**महेन्द्रः** - ततस्ततः ।

**यमः** -

**ततोऽतिरोषोऽपि विनीतवेषो**
**बभाष एषोऽधिपते झषाणाम् ।।**
**दिक्पालमुख्यश्च महाबलोऽसि**
**वीराग्रगण्यः प्रतिलब्धकीर्तिः ।।३१।।**

यस्त्वं पुरा वीरवरान् समग्रान्
सङ्ग्रामरङ्गाङ्गणचारिणस्तान् ।।
जित्वाऽयजस्तेन मखोत्तमेन
यद्राजसूयेन ततोऽहमत्र ।।३२।।

प्राप्तो युद्धपरीप्सुर्नाहं लोकं त्वदीयमाकाङ्क्षे ।।
झषकुलसङ्कुलितं किल बाहुबलस्य प्रशान्तयेऽशान्तः ।।३३।।

**महेन्द्रः** - ततस्ततः ।

**यमः** - ततो दैत्यपवचनाज्यमिश्रणद्विगुणितरोषोषर्बुधं सबुधः पयोऽधिपोऽयं बलिष्ठो वरोर्ज्जितोऽपराजय्य इति विचारजलासारेण शमयन्नचिरादिदं वचनं रचयाम्बभूव ।

श्लाघेयमुपहासो वा त्वदुक्तं न मृषाऽसुर ।।
वार्द्धक्याजगरग्रस्ता युद्धार्हा नो वयं यतः ।।३४।।

**महेन्द्रः** - ततस्ततः ।

**यमः** -

श्रुत्वा तादृग्वचनं तस्योच्चैः सञ्जहास दैत्येन्द्रः ।।
निर्वीरियं दिगिति क्षोणीं गदया निहत्य बहिरागात् ।।३५।।

**महेन्द्रः** - ततस्ततः

**यमः** - (ततस्सर्वतोऽवलोक्य । क्षणं विचिन्त्य।)

नानारत्नधनानां कोशैराढ्यं गृहं हि कौबेरम् ।।
तस्मात्तं भीरुतरं जित्वा नेयं मया हि रत्नादि ।।३६।।

इति विचिन्त्याऽचिन्त्यविक्रमः क्रमेण तत्पुराभ्याशमुपजगाम ।

**महेन्द्रः** - ततस्ततः ।

**यमः** - ततः ।

दृष्ट्वा पुरस्स तु धनाधिपराजधानीं
प्राकारगोपुरगृहापणराजमार्गैः ।।

**स्त्रीरत्नरत्ननिकरैरतिसौष्ठवाढ्यै**
**रम्यां नरेन्द्रभवनैरलकां बलिष्ठः ॥३७॥**

**दितिनन्दनो ननन्द प्रतिकूलोऽपि प्रभुर्न तस्याः सः ॥**
**वैमङ्गल्यं चक्रे किन्तु जगामोग्रमित्रसदनं द्राक् ॥३८॥**

**महेन्द्रः** - ततस्ततः ।

**यमः** - तदा विलम्बितं मदाविलं दन्तावलमिव काञ्चीघणत्कारघोषितप्रघणं रणाङ्गणसञ्चरणनिपुणं तं समायातं विज्ञाय वैश्रवणो वैश्रवणपथ-सञ्चारिणमीक्षणपथपथिकमकुर्वन्नन्तरिक्षेण पथा प्रमथाधिपस्य शरण-मढौकत ।

**ततः प्रविश्याशु धनेशधिष्ण्यं**
**धृष्णुः सतृष्णं विमिमेष सोऽसौ ॥**
**कपर्द्दिमित्रं भवने भ्रमन्नो**
**ददर्श तं योद्धुमना गदाभृत् ॥३९॥**

**महेन्द्रः** - ततस्ततः ।

**यमः** -

**ततः समारुह्य महार्हमुच्चैः**
**सिंहासनं सिंह इव प्रचण्डः ॥**
**प्रपूरयँस्तत्पुरमादिदैत्यो**
**ननाद सांवर्त्तकमेघघोषैः ॥४०॥**

**जितो मया भीरुतरस्सखाऽसौ**
**शिवस्य नित्यं वनवासिनो यः ॥**
**अहं कुबेरोऽस्म्युपहास्य इत्थं**
**विचिन्तयन्नन्तरधाद्भयेन ॥४१॥**

**अतोऽस्ति वीरेण विवर्जितेयं**
**दिशापि नूनं बत चित्रमेतत् ॥**

इति ब्रुवन्नाशु स निर्जगाम
पुरात्प्रवीरः प्रतिवीरमाप्तुम् ।।४२।।

**महेन्द्रः** - ततस्ततः ।

**यमः** - ततः (क्षणं विमृश्य ।) एवं बभाण ।

भुङ्क्ते स्वाम्यं प्राग्दिशः स्वर्पतिर्यत्-
तस्माज्जेयो वज्रधर्त्ता स एव ।।
सैन्यैराढ्यो वीरमानी सपत्नो
विष्णोस्साह्यात् सर्वलोकेशसम्राट् ।।४३।।

इत्थंकारं मनसि विनिश्चित्य स्वराजधानीमटीकत ।

**महेन्द्र** : - ततस्ततः ।

**यमः** -

तदनु स दनुजेन्द्रो दानवान् मन्त्रिणस्स्वान्
सदनुशयसमुत्कान् भार्गवं वन्दनीयम् ।।
सदनमथ सुचारैस्तान् समाहूय हृद्यम्
अवददतिसुखेन स्वानुभूतं च सद्यः ।।४४।।

ततः ।

श्रुत्वा सर्वं भार्गवो भूरितेजास्-
सानन्दं तं प्राह शिष्यं प्रणम्रम् ।।
स्वर्गं जित्वा तत्सुखं भुङ्क्ष्व राजन्
साम्राज्यं द्राङ्निस्सपत्नं तवास्तु ।।४५।।

ततः परमुशनस आशीराशिसुधावाराशिसेवनसमुत्सिक्तसारस्सुरारि-रसुरसैन्यसमावृतः सुरपुरपरिमथनायाभिससार ।

**महेन्द्रः** - (दीर्घमुष्णं विनिःश्वस्य ।) ततस्ततः ।

**यमः** -

ततः समावृत्य पुरं त्वदीयं
सुरेशसैन्येन सुरारिरुच्चैः ।।

**शङ्खं प्रदध्मावतिभीषणं द्राग् -**
**बलावलिप्तः प्रतिवीरकाङ्क्षी ।।४६।।**

अनन्तरममरपुरवरं स्वदरवरप्रतिरवमात्रपरिपूरितं परिज्ञाय सत्वरं गोपुरं प्रविवेश ।

**महेन्द्रः** - (सनिःश्वासम् ।) ततस्ततः ।

**यमः** -

**ततोऽप्सरोवैणिकमात्रलोकं**
**सुरेशलोकं प्रविलोक्य दैत्यः ।।**
**जगर्ज हृष्टस्स जहार दृप्तस्-**
**स्त्रियश्च रत्नानि च कोशजातम् ।।४७।।**

**महेन्द्रः** - (सास्रं तूष्णीं तिष्ठति ।)

**बृहस्पति :** - देवराज प्रकृते प्राकृत इव किं विकृतिं प्राप्नोषि ।

**स्वपुण्येनार्जिते लोके परेणाऽज्ञोऽभिमन्यते ।।**
**केनचिद्धेतुना स्वत्वं तन्मार्गे पथिको यथा ।।४८।।**

तेन क्षणिकमेतत् कष्टम् ।

**यमः** - देवेन्द्र यथाह गुरुस्तथैव ।

**महेन्द्रः** - (अश्रूणि प्रमृज्य ।) भगवन् किं मया प्रतिकरणीयम् । शोकान्धोऽहं सर्वा अपि दिशः शून्याः पश्यामि ।

**बृहस्पतिः** - अयि देवराज नायमवसरः कातर्यस्य ।

**आस्पदस्य हि यो दाता रक्षिताऽस्ति स एव यत् ।।**
**तस्माच्चिन्ता न कर्त्तव्या सर्वदुःखहरो हरिः ।।४९।।**

**यमः** - (सभक्त्युन्मेषम् ।) सुखे दुःखे च स एवास्तु शरणं सदा ।

**महेन्द्रः** - (सधैर्यम् ।) एवं चेत्तमेव गच्छामश्शरणम् ।

(इति निष्क्रान्ताः सर्वे ।)

**।। इति पञ्चमोऽङ्कः ।।**